2. कुलस्य आचारः

[સંસ્કૃતસાહિત્યમાં પ્રાણીકથાઓનું પ્રચલન ઘણા પ્રાચીનકાળથી છે. જાતકમાલા હોય કે પછી પંચતંત્ર કે હિતોપદેશ, દરેક કથાગ્રંથમાં પ્રાણીઓને પાત્ર બનાવીને જાતજાતની કથાઓ પરિકલ્પિત છે.

આજે પણ આવી પ્રાણીકથાઓનું સર્જન થયા કરે છે. આવી જ એક પ્રાણીકથા અહીં પ્રસ્તુત છે. ચાતક નામનું પ્રાણી (પક્ષી) હંમેશાં વરસાદનું જ પાણી પીવે છે. ચાતકકુળનો આ આચાર છે. ચાતક પક્ષીને ત્યાં જન્મ લેનાર પ્રત્યેક શિશુ આજે પણ આ કુલાચારને પાળતું હોય છે.

એક વાર તરસથી પીડાતું એક ચાતકશિશુ પોતાની જનનીની વાત ન માનીને પોતાના આ આદર્શનો ત્યાગ કરવા તત્પર બને છે, ત્યારે અચાનક તેને એક નિર્ધન ખેડૂત પિતાપુત્રનો સંવાદ સાંભળવા મળે છે. આ નિર્ધન પિતા-પુત્ર પાસેથી પ્રેરણા મેળવી તે જનની પાસે પાછું ફરે છે અને પોતાના આદર્શને પાળવા તૈયાર થઈ જાય છે.

પ્રસ્તુત પાઠમાં પરંપરાથી ચાલ્યા આવતા અને જીવનને ઉન્નત બનાવતા વિવિધ આચારોને પાળવાની પ્રેરણા મેળવવાની છે. પ્રાણીઓને નિમિત્ત બનાવીને છેવટે તો માણસને ઉપદેશ આપવામાં આવ્યો છે. એ સાથે અહીં વપરાયેલાં ક્રિયાપદો અને કારકપદો (વિભક્તિઓ)નો પણ અભ્યાસ કરવાનો છે.]



एकः चातकशिशुः आसीत् । स एकदा तृषया पीडितः जनन्याः समीपं व्रजति वदति च, ''अम्ब ! तृषा मां पीडयति । अहं जलं पातुम् इच्छामि । सम्प्रति मेघजलं न मिलति, अतः तडागजलमेव पातुम् इच्छामि ।'' जननी वदति, ''बाल ! वयं तु मेघजलम् एव पिबामः, तडागजलं न पिबामः । एषः अस्माकं कुलस्य आचारः । अतः त्वं तडागजलं पातुम् न शक्नोषि'' इति ।

चातकशिशुः कथयति, ''अम्ब ! महती मे तृषा । अधुना आकाशे मेघान् न पश्यामि । कदा मेघः वर्षिष्यति कदा च अहं मेघजलं पातुं शक्नोमि, इति न जानामि । अतः तृषया पीडितोऽहं तडागजलं पातुं गच्छामि ।''

जननी पुनरपि चातकशिशुं बोधयति, ''बाल ! न अयम् अस्माकं कुलाचारः । कुलाचारः सदैव रक्षितव्यः एव । अतः त्वं तडागजलं पातुं न अर्हसि । तृषायाः सहनं कृत्वा मेघस्य प्रतीक्षां कर्तुम् अर्हसि त्वम् ।''

जनन्याः कथनम् अश्रुत्वा चातकशिशुः तडागजलं पातुं तडागं गन्तुं निर्गच्छति । मार्गे परिश्रान्तः स यदा एकस्य कृषकस्य गृहस्य समीपे तिष्ठति तदा तातपुत्रयोः वार्तालापं शृणोति ।

कृषकः वृद्धः मरणासन्नः च आसीत् । तस्य समीपे स्थितः तस्य पुत्रः तस्मै कृषकाय कथयति, ''तात ! अद्य मार्गे मया धनस्यूतः प्राप्तः । तस्य दर्शनात् आनन्दः जातः । तेन मदीयं दारिद्र्यं नष्टं भविष्यति इति विचार्य धनस्यूतग्रहणाय अहं हस्तं प्रासारयम् । किन्तु तदैव मया भवदीयः उपदेशः स्मृतः – 'अन्यस्य धनस्य ग्रहणम् अस्माकं कुलाचारः न' इति । अतः अहं तं धनस्यूतं तत्रैव अत्यजम् ।''

चातकशिशुः सर्वं शृणोति । सः विचारयति - 'अहो ! मरणासन्नस्य वृद्धस्य तत्पुत्रस्य च स्वकीयं कुलाचारं पालयितुं कीदृशी श्रद्धा । अहं तु कुलाचारं न पालयामि । वयं मेघजलमेव पिबामः इति अस्माकं कुलाचारः । तमहं त्यक्तुं प्रवर्ते । एतत् अनुचितमस्ति ।'



सः चिन्तयति -

पशवः पक्षिणश्चैव मानवाश्च सदाशयाः ।
रक्षन्ति स्वकुलाचारं रक्षामि कुलमात्मनः ॥

एवं विचिन्त्य सः मातरं प्रत्यागच्छति सर्वं वृत्तान्तं च कथयति । माता सन्तोषमनुभवति, शिशवे च आशीर्वादं ददाति । अल्पे एव काले मेघवृष्टिः भवति । मेघजलं पीत्वा चातकशिशोः तृषा शाम्यति ।

ટિપ્પણી

નામ (પુંલ્લિંગ) : आचारः આચરણ, પરંપરાથી આચરવામાં આવતો વ્યવહાર (વિ. अनाचारः) **तडागः** તળાવ **कृषकः** ખેડૂત **स्यूतः** થેલો

(સ્ત્રીલિંગ) : तृषा તરસ (પર્યાય पिपासा) **जननी** માતા **वृष्टिः** વરસાદ (પર્યાય वर्षा)

(નપુંસકલિંગ) : शतम् એક સો **पानम्** પીવું તે, પીવાની ક્રિયા

સર્વનામ : माम् મને **मे** મને (પું.) **मया** મારાથી **तेन** તેનાથી (પું.) **त्वया** તારાથી **तस्यै** તેને (સ્ત્રી.)

વિશેષણ : महती મોટી, ખૂબ, વધારે (સ્ત્રી.) **परिश्रान्त** થાકેલું.

અવ્યય : सम्प्रति હમણાં, અત્યારે **अतः** આથી, એટલા માટે **एव** જ **इति** એમ, આ પ્રમાણે **अधुना** હમણાં, અત્યારે **कदा** ક્યારે **अद्य** આજે **सम्यक्** સારી રીતે **ततः** તે પછી

સમાસ : चातकशिशुः (चातकस्य शिशुः, षष्ठी तत्पुरुष) । मेघजलम् (मेघस्य जलम् । षष्ठी तत्पुरुष) । तडागजलम् (तडागस्य जलम्, षष्ठी तत्पुरुष) । कुलाचारः (कुलस्य आचारः । षष्ठी तत्पुरुष) । तातपुत्रयोः (तातः च पुत्रः च - तातपुत्रौ । तयोः । इतरेतर द्वन्द्व) मरणासन्नः (मरणम् आसन्नः । द्वितीया तत्पुरुष) । धनस्यूतः (धनस्य स्यूतः । षष्ठी तत्पुरुष) । धनस्यूतग्रहणाय (धनस्यूतस्य ग्रहणम् - धनस्यूतग्रहणम्, तस्मै । षष्ठी तत्पुरुष) । तत्पुत्रस्य (तस्य पुत्रः - तत्पुत्रः, तस्य । षष्ठी तत्पुरुष) । अनुचितम् (न उचितम् - अनुचितम्, नञ्तत्पुरुष) । मेघवृष्टिः (मेघस्य वृष्टिः । षष्ठी तत्पुरुष) ।

કૃદન્તપદ : गत्वा (गम् + त्वा) । पातुम् (पा + तुम्) । कृत्वा (कृ + त्वा) । कर्तुम् (कृ + तुम्) । अश्रुत्वा (न > अ + श्रु + त्वा) । गन्तुम् (गम् + तुम्) । विचार्य (वि + चर् > चारि (प्रेरक) + त्वा > य) । श्रुत्वा (श्रु + त्वा) । रक्षितुम् (रक्ष् + तुम्) । त्यक्तुम् (त्यज् + तुम्) । विचिन्त्य (वि + चिन्त् + त्वा > य) । पीत्वा (पा + त्वा) । (સમજૂતીની આ પદ્ધતિ અધ્યાપન સહાય માટે છે.)

ક્રિયાપદ : પ્રથમ ગણ (પરસ્મૈપદ) **वद् (वदति)** બોલવું, કહેવું **इष् > इच्छ् (इच्छति)** ઇચ્છવું, ચાહવું **मिल् (मिलति)** મળવું **पा > पिब् (पिबति)** પીવું **अर्ह् (अर्हति)** યોગ્ય હોવું, સમર્થ હોવું **निर् + गम् > गच्छ् (निर्गच्छति)** નીકળવું **स्था > तिष्ठ् (तिष्ठति)** ઊભા રહેવું, સ્થિર રહેવું **भू (भवति)** હોવું, થવું **त्यज् (त्यजति)** ત્યાગવું, છોડી દેવું **आ + चर् (आचरति)** આચરવું, અમલમાં મૂકવું **वृष् (वर्षति)** વરસવું **रक्ष् (रक्षति)** રક્ષા કરવી **प्रति + आ + गम् > गच्छ् (प्रत्यागच्छति)** પાછા જવું, પાછા વળવું **अनु + भू (अनुभवति)** અનુભવવું,

(आत्मनेपद) प्र + वृत् (प्रवर्तते) વર્તવું,

ચતુર્થ ગણ : शम् (शाम्यति) શાંત થવું

છઠ્ઠો ગણ (आत्मनेपद) : मृ (म्रियते) મરણ પામવું

દશમ ગણ : पीड् (पीडयति) પીડા આપવી, દુઃખ આપવું **कथ् (कथयति)** કહેવું **पाल् (पालयति)** પાલન કરવું **चिन्त् (चिन्तयति)** વિચાર કરવો, વિચારવું.

વિશેષ

शब्दार्थ : पातुम् न शक्नोषि તું પી શકતો નથી. **अम्ब** હે માતા **वर्षिष्यति** વરસશે. **रक्षितव्यः** રક્ષા કરવી જોઈએ. **सहनं कृत्वा** સહન કરીને **परिश्रान्तः** થાકેલો **तातपुत्रयोः** પિતા અને પુત્રનો **मरणासन्नः** મરણની નજીક પહોંચેલો **धनस्यूतः** ધનની થેલી **दारिद्र्यम्** ગરીબી, નિર્ધનતા **हस्तम् प्रासारयम्** મેં હાથ ફેલાવ્યો. મેં હાથ લંબાવ્યો. **त्यक्तुं प्रवर्ते** છોડવા માટે પ્રવૃત્ત થયો છું. **अनुचितमस्ति** અનુચિત છે. ગેરવ્યાજબી છે. **भवादृशाः** આપના જેવા **कुलमात्मनः** પોતાના કુળને **प्रत्यागच्छति** પાછો આવે છે. **अनुभवति** અનુભવે છે. **ददाति** આપે છે. **अल्पे एव काले** થોડા જ વખતમાં **तृषा शाम्यति** તરસ શમી જાય છે.

संधि : पीडितोऽहम् (पीडितः अहम्) । पुनरपि (पुनः अपि) । पक्षिणश्चैव (पक्षिणः च एव) । मानवाश्च (मानवाः च) ।

स्वाध्याय

1. विकल्पेभ्यः समुचितं पदम् चित्वा लिखत ।

(1) तृषापीडितः शिशुः कस्य समीपं गच्छति ? ◯

(क) जनन्याः (ख) नीडस्य (ग) जलस्य (घ) गगनस्य

(2) 'मेघ'-शब्दस्य पर्यायः कः ? ◯

(क) जलम् (ख) वृष्टिः (ग) जलदः (घ) गगनम्

(3) सर्वैः किं रक्षितव्यम् ? ◯

(क) तडागः (ख) कुलाचारः (ग) मेघः (घ) शिशुः

(4) वृद्धः कीदृशः आसीत् ? ◯

(क) अन्धः (ख) विकलः (ग) मरणासन्नः (घ) स्वस्थः

(5) शिशुः कस्य प्रतीक्षां करोति ? ◯

(क) मेघस्य (ख) मेघाय (ग) मेघम् (घ) मेघेन

(6) 'पुनरपि' शब्दस्य उचितं सन्धिविच्छेदं दर्शयत ! ◯

(क) पुन + रपि (ख) पुनो + अपि (ग) पुनः + अपि (घ) पुनर् + पि

(7) अहं तडागजलं पातुम् ..... ।

(क) इच्छति (ख) इच्छसि (ग) इच्छामि (घ) इच्छतु

2. संस्कृतभाषया उत्तरं लिखत ।

(1) तृषया पीडितः कः आसीत् ?

(2) चातकशिशुः किं पातुं न अर्हति ?

(3) कृषकपुत्रस्य दारिद्र्यं केन नष्टं भविष्यति ?

(4) कृषकपुत्रेण मार्गे किं प्राप्तम् ?

(5) शिशोः तृषा केन नष्टा ?

3. रेखाङ्कितपदानां स्थाने कोष्ठकात् पदं प्रस्थाप्य प्रश्नवाक्यं रचयत ।

(कः, का, कुत्र, कीदृशः, किम्, कस्यै)

(1) जननी शिशुं बोधयति ।

(2) मार्गे परिश्रान्तः सः तिष्ठति ।

(3) कृषकः वृद्धः आसीत् ।

(4) धनस्यूतः मार्गे प्राप्तः ।

(5) सः तस्यै सर्वं वृत्तान्तं कथयति ।

4. निर्देशानुसारं धातुरूपाणां परिचयं लिखत ।

धातुरूपम्	धातुः	कालः/लकारः	पदम्	पुरुषः	वचनम्
(1) इच्छामि	.....	.....	.....	.....	.....
(2) गच्छति	.....	.....	.....	.....	.....
(3) अर्हसि	.....	.....	.....	.....	.....
(4) कथयति	.....	.....	.....	.....	.....
(5) वदति	.....	.....	.....	.....	.....

5. मातृभाषायाम् उत्तराणि लिखत ।

(1) કુલાચાર એટલે શું ?

(2) માતા ચાતકશિશુને શું ન કરવા કહે છે ? શા માટે ?

(3) નિર્ધન હોવા છતાં કૃષકપુત્રે શા માટે ધનસ્યૂતને સ્પર્શ પણ ન કર્યો ?

(4) ચાતકશિશુએ તડાગજળ શા માટે ન પીધું ?

પ્રવૃત્તિ

- શાળામાં પળાતા વિવિધ આચારોની સૂચિ બનાવો.
- તમારા પરિવારમાં પળાતા વિવિધ કુલાચારોની સૂચિ બનાવો.
- 'તરસ્યું ચાતકબાળ' - એવા શીર્ષક હેઠળ આ વાર્તાને માતૃભાષામાં લખો.
- પોતાનાથી નાના સ્વજનના જન્મદિવસે शतं जीव शरदः એ વચન બોલીને શુભેચ્છાઓ આપો.